This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

२३

॥कण्वशाखेशावास्यशंकरभाष्यप्रारंभः॥ ॥श्रीराम॥

पृ० ३०

ACC.NO. - M1091
शीर्षक - ईशावास्य भाष्य
काल - शके 1664.
पृष्ठ - 13.

K.K.S.U. LIBRARY RAMTEK 441 106 M1091 Dist. Nagpur

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश॰ भा॰
१

श्रीगणेशाय नमः ॥ श्रीशंकराय नमः ॥ ॥ ॐ नमो नारायणाय ॥ ॐ ॥ ॥ ईशावास्यमित्यादयो मंत्राः
कर्मस्वविनियुक्तास्तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वाद्य याथात्म्यं चात्मनः शुद्धत्वापापविद्ध
त्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणं कर्मणा विरुध्येतेति युक्त एवैषां कर्मस्वविनियोगः ॥ नह्ये
वंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं वा कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात् ॥ सर्वा
सामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात् ॥ गीतानां मोक्षधर्माणां चैवं आत्मयाथात्म्यप
रत्वात् ॥ तस्मादात्मनोनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं क
र्माणि विहितानि ॥ यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न का
णकुंठत्वाद्यनधिकारधर्मवानित्यात्मानं मन्यते सोधिक्रियते कर्मस्विति हि अधिकारविदो वदंति ॥ त

श्री
वि
अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मादेते मंत्रा आत्मनो याथात्म्य प्रकाशनेनानात्मविषयं स्वाभाविकं कर्मविज्ञानं निवर्त्तयंतः शोकमोहा
दिच संसारधर्मविछित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयंतीत्येवमुक्ताभिविधेय संबंध
जनान्मंत्रान्संक्षेपतो व्याख्यास्यामः॥ ईशाॅ ईष्टे इतीट् तेन ईशाॅ ईशिना परमेश्वरः परमात्मा सर्वस्य स हि
सर्वमीष्टे सर्वभूतानामात्मा सन्। तेन स्वेनात्मना ईशा। वास्यं। आच्छादनीयं। किं। इदं सर्वं। यत्किंच। ज
ग्त्यां जगत्। जगत्यां पृथिव्यां जगत्तत्सर्वं स्वेनात्मना ईशेन अहमेवेदं सर्वमिति परमार्थ सत्यरूपेणानृतमि
दमाच्छादनीयं स्वेन परमात्मना। यथाचंदनाऽगर्वादे रुदकादि संबंधजं क्लेदादिजं दौर्गंध्यं तत्स्वरूपनि
र्घर्षणेनाच्छाद्यते स्वेन पारमार्थिकेन गंधेन। तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्व भोक्तृत्वादि लक्षणं।
जगत्। द्वैतरूपं पृथिव्यां जगत्यामित्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थस

प्रत्यगात्मतया ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश-भा
२

वेदा३ तत् वा सन्न्या

स्यात्मभावनया त्यक्तं स्यात्। एवमीश्वरात्मभावनयात्युक्तस्य पुत्राद्येषणात्रयस्य नोविदुः स ह्यधिकारो।
नकर्मस्तु। तेन त्यक्तेन। त्यागेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रोऽस्त्यो वा आत्मसंबंधितया अभावादात्मानं पाल
आत्मानमि तिशेषः २ यतिअतस्त्यागेनेत्यथमेवार्थः। भुंजीथाः॥ पालयेथाः एवंत्यक्तैषणस्त्वं मा गृधः माकांक्षां माकार्षी
र्धनविषयांकस्यस्वित्। कस्यचित्। धनं स्वस्य परस्य वा। धनमाकांक्षीरित्यर्थः॥ स्विदित्यनर्थको निः सर्वा
अथवामागृधः। कस्मात्कस्यस्विद्धनमित्याक्षेपार्थो न कस्यस्विद्धनमस्ति यद्गृह्येतात्मैव सर्वमितीश्वरप
भावनया सर्वंत्यक्तमत आत्मन एवेदं सर्वमात्मैव च। सर्वमतो मिथ्याविषयांगृर्धिं माकार्षीरित्यर्थः। एवं
त्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठतया आत्मा रक्षितव्य इत्येष वेदार्थोऽथेतरस्यानात्म
अनात्म विदः १ त्मज्ञतया आत्मग्रहणायाशक्तस्येदमुपदिशति मंत्रः। कुर्वन्नित्यादि॥ कुर्वन्नेवेह निर्वर्तयन्नेव। कर्माणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निहोत्रादीनि जिजीविषेत्। जीवितुमिच्छेत्॥ शतं शतसंख्याकाः समाः संवत्सरान्। तावद्धि पुरुषस्य
परमायुर्निरूपितं तथा प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत्कुर्वन्नेव कर्माणीत्येतद्विधीयते। एवं प्रकारे
त्वयि जिजीविषति नरे नरमात्राभिमानिनि इतः एतस्मात् कुर्वतो वर्त्तमानात् प्रकारात्॥ अन्यथा प्रकारांतरं
नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्यत इत्यर्थः॥ अतः शास्त्रविहितानि कर्माण्यग्नि
होत्रादीनि कुर्वन्नेव जिजीविषेत्॥ कथं पुनरिदमवगम्यते॥ पूर्वेण मंत्रेण संन्यासिनो ज्ञाननिष्ठतोक्ता द्वितीयेन
तदशक्तस्य कर्मनिष्ठेति। उच्यते। ज्ञानकर्मणोर्विरोधं पर्वतवदकंप्यं यथोक्तं न स्मरसि किं। इहाप्युक्तं यो
हि जिजीविषेत्स कर्म कुर्वन्नीशावास्यमिदं सर्वं तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनमिति। न जीवि
ते मरणे वा गृधिं कुर्वीतारण्यमियादिति च पदं ततो न पुनरेयादिति संन्यासशासनादुभयोः फलभेदं वक्ष्यति।

मियादि २ वा।

एवं २
नो ५
वे २
३

ईशा·भा·
२ - चु२

तरेण॥१ रिच्यते
रमौद्वावेव पंथानौ अनु निष्क्रांततरौ भवतः॥ क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तयोः संन्यासएवातिरेचयति।
न्यासएवात्यरेचयदितितैत्तिरीयके॥ द्वाविमावथ पंथानौ यत्र वेदाः प्रतिष्ठिताः प्रवृत्तिलक्षणो धर्मो निवृत्तावपि
भाषितइत्यादिपुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता॥ विभागं चानयोर्दर्शयिष्यामः॥२॥॥
अथेदानीमविद्वन्निंदार्थोयं मंत्र आरभ्यते॥ असूर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोप्यसुरास्तेषांस्वभू
ता असूर्याः नाम॥ नामशब्दोनर्थको निपातः। ते लोकाः कर्मफलानि लोक्यंते दृश्यंते भुज्यंत इति जन्मानि। अंधे
न अदर्शनात्मकेनाज्ञानेन तमसा आवृता आच्छादिताः तान् स्थावरांतान् प्रेत्य त्यक्त्वा इमं देहं अभिगच्छं मृता
ति। आत्मसाक्षात्कारकारिणं देहं चरमं यथाकर्म यथाश्रुतं॥ ये के चात्महनः आत्मानं घ्नंतीत्यात्महनः के राम
ते येऽविद्वांसः। कथं ते आत्मानं नित्यं हिंसंति॥ अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणाद्विद्यमानस्या २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मनोयत्कार्यंफलंअजरामरत्वादिसंवेदनादिलक्षणंतद्धतस्येवतिरोभूतंभवतीतिप्राकृताह्यविद्वांसोजना
आत्महनउच्यंते॥तेनह्यस्यात्महननदोषेणसंसरंति॥३॥यस्यात्मनोहननादविद्वांसःसंसरंतितद्विपर्ययेणवि
द्वांसोमुच्यंतेनात्महनःतत्कीदृशमात्मतत्वमिति॥उच्यते॥अनेजत्नएजत्।एजृकंपने।कंपनंचलनंस्वा एजत्
वस्थाप्रच्युतिस्तद्वर्जितंसर्वदैकरूपमित्यर्थः।तच्चएकंसर्वभूतेषु।मनसःसंकल्पादिलक्षणात्जवीयःजव
वत्तरं।कथंविरुद्धमुच्यते।ध्रुवंनिश्चलमिदंमनसोजवीयइतिच॥नैषदोषः॥निरुपाध्युपाधिमत्वोपपत्तेः।तत्र
निरुपाधिकंस्वेनरूपेणोच्यते॥अनेजदेकमिति।मनसोंतःकरणस्यसंकल्पादिलक्षणस्योपाधेरनुवर्त्तनादि
हदेहस्थस्यमनसोब्रह्मलोकादिदूरस्थसंकल्पनंक्षणमात्राद्भवतीत्यतोमनसोजविष्ठत्वंलोकेप्रसिद्धंतस्मि
न्मनसिब्रह्मलोकादीन्द्रुतंगच्छतिप्रथमंप्राप्तइवात्मचैतन्याभासोगृह्यतेऽतोमनसोजवीइत्याह।नैनत्।न ८५

[illegible] त्वात् सर्वव्यापि ३

न

ईशा·भा· एनत्नु ॥ देवा द्योतनाद्देवाश्चक्षुरादीनींद्रियाणि एनत्प्रकृतमात्मतत्त्वं । नाप्नुवन् नाप्नवंतः तेभ्यो मनोजवीयो मनो
४ व्यापारव्यवहितत्वादाभासमात्रमप्यात्मनो नैव देवानां विषयी भवति । यस्माज्जवनान्मनसोपि पूर्वमर्षत् पू
र्वमेव गतं व्योमवद्व्यापि ॅ तदात्मतत्वं सर्वसंसारधर्मवर्जितं स्वेन निरूपाधिकेन स्वरूपेणाविक्रियमेव सदुपा
धिकृताः सर्वाः संसारविक्रिया अनुभवती ति वा ॅविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येत ति ४
५८ दाह । तद्धावतोन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधा ति ॥ द्रुतं गच्छतः अन्यान्मनोवागिंद्रियप्रभृतीन्
आत्मविलक्षणान् । अत्येति अतीत्य गच्छतीव इवार्थं स्वयमेव दर्शयति । तिष्ठदिति । स्वयमविक्रियमेव स
दित्यर्थः । तस्मिन् आत्मतत्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातरि अंतरिक्षे श्वसितीति वायुः । सर्वप्रा
णभृत् क्रियात्मको यदाश्रयाणि कार्यकारणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जग राम ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तो विधारयितृ स मातरिश्वा आपः कर्माणि प्राणिनां चेष्टा वैलक्षणानि अग्न्यादित्यादीनां ज्वलनदहनप्रका
शाभिवर्षणादिलक्षणानि दधाति विभजतीत्यर्थः धारयतीति वा। भीषास्माद्वातः पवते। भीषोदेति सूर्य इत्यादि
श्रुतिभ्यः सर्वा हि कार्यकारणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवंतीत्यर्थः॥४॥ ॥मं
त्राणां जामितानास्तीति पूर्वमंत्रोक्तमप्यर्थं पुनराह॥ तदेजति तन्नैजति तद्दूरे तद्वंतिके। तदंतरस्य सर्वस्य तदु सर्वस्या
स्य बाह्यतः॥ तत्। आत्मतत्त्वं यत्प्रकृतं एजति चलति तदेव नैजति स्वतो नैव चलति अचलमेव सच्चलतीवेत्यर्थः॥ किं
च तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद्दूर इव॥ तद्वंतिके तदु अंतिके समीपेत्यंतमेव विदुषामात्मत्वात्। न
केवलं दूरे अंतिके च तदंतः। अभ्यंतरे॥ सर्वस्यात्मा सर्वांतर इति श्रुतेः। अस्य सर्वस्य। जगतो नामरूपक्रियात्मक
स्य। तदु। उ अपि। सर्वस्यास्य बाह्यतः। व्यापित्वादाकाशवन्निरतिशयसूक्ष्मत्वादंतः प्रज्ञानघन एवेति [illegible] तेः शास 6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकरसं

ईशा·भा·
५

नान्निरंतरं॥५॥ ॥यस्तुसर्वाणिभूतान्यात्मन्नेवानुपश्यति॥सर्वभूतेषुचात्मानंततोनविजुगुप्सते॥६॥यस्तु
यःपरिव्राट्मुमुक्षुः।सर्वाणिभूतानिअव्यक्तादीनिस्थावरांतानि॥आत्मन्नेवानुपश्यति॥आत्मव्यतिरिक्ता
निनपश्यतीत्यर्थः॥सर्वभूतेषुसर्वेषुभूतेषुचतेष्वेवचात्मानंतेषामपिभूतानांस्वात्मानमात्मत्वेनयथास्यका
कार्यकारणसंघातस्यात्माहंसर्वप्रत्ययसाक्षिभूतश्चेतयिताकेवलोनिर्गुणोनैवस्वरूपेणाव्यक्तादीनांस्थावरां ने ४
तानामहमेवात्मेतिसर्वभूतेषुचात्मानंयस्तुनिर्विशेषंपश्यतिसततस्तस्मादेवदर्शनात्।नविजुगुप्सते॥विजु
गुप्सांघृणांनकरोतीतिप्राप्तस्यैवानुवादोयं।सर्वाहिघृणाआत्मनोन्यद्दुष्टंपश्यतोभवतिआत्मानमेवत्वत्यंतवि
शुद्धंनिरंतरंपश्यतोनघृणानिमित्तमस्तीतिप्राप्तमेवततोनविजुगुप्सतइति॥६॥ ॥इममेवार्थमन्योपिमंत्रआह॥ राम
यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः॥तत्रकोमोहःकःशोकएकत्वमनुपश्यतः॥७॥ ॥यस्मिन्सर्वाणिभू ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी१ जा २

तानि॥ यस्मिन्काले यथोक्तात्मनि नान्येव भूतानि सर्वाणि परमार्थात्मदर्शनात्। आत्मैवाभूत् आत्मैव संवृत्तः। परमा

र्थवस्तु विजानतः। तत्र तस्मिन्काले तत्रात्मनि वा को मोहः कः शोकः शोकश्च मोहश्च कामकर्मबीजमज्ञानतो भवति न त्वा कर्मणः

त्मैकत्वं विशुद्धं गगनोपमं पश्यतः को मोहः कः शोकः इति शोकमोहयोरविद्याकार्ययोराक्षेपेण संबंधं प्रकाशनात् भाष्ये ३

त्सकारणस्य संसारस्यात्यंतमेवोच्छेदः प्रदर्शितो भवति॥ योयमतीतैर्मंत्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षण इत्या

हायं मंत्रः॥ स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं॥ कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोर्थान्व्य

दधाच्छाश्वतीभ्यः समाभ्यः॥८॥ स पर्यगात्। स यथोक्त आत्मा पर्यगात्। परि समंतात्। अगात्। गतवान्। आका

शवद्व्यापीत्यर्थः॥ शुक्रं। शुद्धं। ज्योतिष्मद्दीप्तिमानित्यर्थः। अकायं। अशरीरो लिंगशरीरवर्जित इत्यर्थः। अव्रणं।

अक्षतं। अस्नाविरं स्नावाः सिरा यस्मिन्न विद्यंत इत्यस्नाविरं॥ आव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः

नं

(६)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येषामुपरि भवंतियश्चोपरि भवति सस्वयमेव सर्वोभवतीति स्वयंभूः ॥८

ईश॰भा॰ शुद्धंनिर्मलं॥अपापविद्धं। धर्माधर्मादिपापवर्जितं। शुक्रमित्यादीनि वचांसिपुल्लिंगत्वेनपरिणेयानि॥सपर्यगादि
६ त्युपक्रम्यकविर्मनीषीत्यादिनापुल्लिंगत्वेनोपसंहारात्॥कविः। क्रांतदर्शी। सर्वदृक्। नान्यदतोस्तिद्रष्टृइत्या
दिश्रुतेः। मनीषी मनसईशितासर्वज्ञईश्वरइत्यर्थः। परिभूः सर्वेषांपर्युपरिभवतीतिपरिभूः। स्वयंभूः स्वय
मेवभवतीतिस्वयंभूः सनित्यमुक्तईश्वरोयाथातथ्यतः सर्वज्ञत्वात्। यथातथाभावोयाथातथ्यं यथाभूतकर्मफ
लसाधनतः अर्थान्कर्तव्यपदार्थान्व्यदधात् विहितवान् यथानुरूपंव्यभजदित्यर्थः। शाश्वतीभ्यः। नित्या
भ्यः। समाभ्यः। संवत्सराख्येभ्यः। प्रजापतिभ्यइत्यर्थः॥८॥अत्राद्येनमंत्रेणसर्वैषणापरित्यागेनज्ञाननिष्ठो
क्ताप्रथमोवेदार्थईशावास्यमिदंसर्वंमागृधः कस्यस्विद्धनमिति। अज्ञानांजिजीविषूणांज्ञाननिष्ठाऽ राम
संभवेकुर्वन्नेवेहकर्माणिजिजीविषेदितिकर्मनिष्ठोक्ताद्वितीयोवेदार्थः। अनयोर्निष्ठयोर्विभागोमंत्रद ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्शितयोर्बृहदारण्यकेऽपि दर्शितः। सोकामयत जायामेस्यादित्यादिना ऽज्ञस्य कामिनः कर्माणीति मन एवास्यात्मा

वाग्जाया इत्यादिवचनादज्ञत्वं कामित्वं च निश्चितमवगम्यते। तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनात्म

स्वरूपावस्थानं॥ जायाद्येषणात्रयसंन्यासेन चात्मविदां कर्मनिष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता

किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्यादिना। ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्योऽसूर्यानाम इत्या

दिनाऽविद्वन्निंदाद्वारेणात्मनो याथात्म्यं स पर्यगादित्येतदंतैर्मंत्रैरुपदिष्टं ते ह्यत्राधिकृता न कामिन इति॥ ॥

तथा च श्वेताश्वतराणां मंत्रोपनिषदि अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टमित्यादि विभज्यो

क्तं ये तु कर्मनिष्ठा कर्म कुर्वंत एव जिजीविषवस्तेभ्य इदमुच्यते॥ अंधं तमः प्रविशंति येऽसंभूतिमुपासते॥ ततो भू

य इव ते तमो यऽ उ संभूत्यां रताः॥९॥ कथं पुनरवगम्यते न तु सर्वेषामिति॥ उच्यते॥ अकामिनः साध्यसाधनभे

अध्याया १ विद्या २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश·भा·
७ न

वित्तं ३

दोपमर्दैन यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतो यदात्मैकत्व
विज्ञानं तेनैकेन चित्कर्मणा ज्ञानांतरेण बाह्यमूढः नैसमुच्चिचीषति। इह तु समुच्चिचीषयाविद्वदविद्वद्भिन्नं दाक्रियते
तत्र च यस्य येन समुच्चयः संभवति न्यायतः शास्त्रतो वा तदिहोच्यते॥ यद्दैवं दैवतादिज्ञानं कर्मसंबंधित्वेनोप
न्यस्तं न परमात्मज्ञानं विद्ययादेवलोक इति पृथक्फलश्रवणात्। [illegible] यो ज्ञानकर्मणोरिहैकैकानुष्ठाननिं
दासमुच्चिचीषया न निंदापरैवैकैकस्य पृथक्फलश्रवणात् विद्ययातदारोहंति विद्ययादेवलोकः न तत्र
दक्षिणायंति कर्मणा पितृलोक इति न हि शास्त्रविहितं किंचिदकर्त्तव्यतामियात् तत्र अंधं अदर्शनात्मकं तमः प्र
विशंतिके। ये अविद्यां विद्याया अन्या अविद्या कर्मेत्यर्थः। तामविद्यामग्निहोत्रादिलक्षणामेव केवलां उपा
सते तत्पराः संतोनुतिष्ठंतीत्यभिप्रायः। ततः तस्मादंधात्मकात् तमसः भूय इव। बहुतरमेव ते तमः प्रविशंति। क

कै
त४
रा
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्महित्वायेउ। विद्यायामेवदेवताज्ञाने। रताः॥९॥ तत्रावांतरफलभेदं विद्याकर्मणोः समुच्चयकारणमाहान्यथा
फलवदफलवतोः सन्निहितयो रंगांगितैवस्यादित्यैन्यतु। पृथगेवविद्यया क्रियते फलमित्याहुः। अन्यदाहुः रवि
द्यया कर्मणा क्रियत इति॥ तथोक्तं। कर्मणा पितृलोको विद्यया देवलोक इति॥ एवं शुश्रुमश्रुतवंतो वयं। धीराणां
ज्ञानं धीमतां वचनं ये आचार्याः नः अस्मभ्यं तत् कर्म च विचचक्षिरे व्याख्यातवंतस्तेषामयमागमः पारंपर्यागत इत्यर्थः
१०॥ ॥ यत एवं विद्यां चाविद्यां चा देवताज्ञानं कर्म चेत्यर्थः। यस्तत् एतत् उभयं सह। एकेन पुरुषेणानुष्ठेयं वेदत
३ एक स्येदं समुच्चयकारिण एवं पुरुषार्थसंबंधः क्रमेण स्यादित्युच्यते। अविद्यया कर्मणाग्निहोत्रादिना मृत्युं स्वाभाविकं
कर्मज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वा अतिक्रम्य विद्यया देवताज्ञानेन अमृतं देवतात्मभावं अश्नुते। प्राप्नोति॥ त
द्ध्यमृतमुच्यते यद्देवतात्मगमनं॥ अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निंदोच्यते॥ अं धः

वदंति विद्याय कः विद दारोहं तेः॥२

(४)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ई॰शा॰भा॰ तमः प्रविशंति येऽसंभूतिं। संभवनं संभूतिः सा समग्रस्यैव कार्यस्य यस्य सा संभूतिस्तस्या अन्या असंभूतिः प्रकृतिः कारण

८ विद्याऽमव्याकृताख्यं तामसंभूतिमव्याकृताख्यां प्रकृतिं कारणमविद्याकामकर्मबीजभूतामदर्शनात्मिकां उपासते ये ते

तदनुरूपमेवांधं तमोऽदर्शनात्मकं प्रविशंति ततः तस्मादपि भूयो बहुतरमिव तमः प्रविशंति ये संभूत्यां कार्यब्रह्मणि

हिरण्यगर्भाख्ये रताः॥१२॥ अधुनोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह॥ अन्यदेव पृथगेव आहुः

फलं संभवात्संभूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवंत इत्यर्थः। तथान्यदाहुरसंभवात् असंभू

तेरव्याकृतोपासनाद्यदुक्तमंधं तमः प्रविशंतीति प्रकृतिलय इति च पौराणिकैरुच्यत इत्येवं शुश्रुम धीराणां ये नस्त वचनं २

द्विचचक्षिरे व्याकृताव्याकृतोपासनाफलं व्याख्यातवंत इत्यर्थः॥१३॥ यत एवमतः समुच्चयः संभूत्यसंभूत्युपा राम

सनयोर्युक्त एवैकपुरुषार्थत्वाच्चेत्याह। संभूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन विनाशो धर्मो यस्य का ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यस्य संतेन धार्मिणाऽभेदेनोच्यते। विनाश इति तेन तदुपासनेनानैश्वर्यम धर्मकामादिदोषजातं च मृत्युं तीर्त्वा हिरण्य
गर्भोपासनेन ह्याणिमादिप्राप्तिः फलं तेनानैश्वर्यादि मृत्युमतीत्य असंभूत्याऽव्याकृतोपासनेन अमृतं प्रकृतिलय ल
क्षणं अश्नुते। संभूतिं च विनाशं चेत्यत्र वर्णलोपेन निर्देशो द्रष्टव्यः प्रकृतिलयफलश्रुत्यनुरोधात्॥ मानुषदैववि
त्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयांतं। एतावती संसारगतिरतः परं पूर्वोक्तमात्मैवाभूद्विजानत इति सर्वात्म
भाव एव सर्वैषणासन्यासज्ञाननिष्ठाफलं एवं द्विः प्रकारः प्रवृत्ति निवृत्ति लक्षणो वेदार्थोत्रप्रकाशितः॥१४॥ ॥
तत्र प्रवृत्ति लक्षणस्य वेदार्थस्य विधिप्रतिषेध लक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यांतं ब्राह्मणमुपयुक्तं निवृत्ति
लक्षणस्य प्रकाशने तदूर्ध्वं बृहदारण्यकं॥ तत्र निषेकादिस्मशानांतं कर्म कुर्वन्नुजिजीविषेद्यो विद्यया मृत्युं तीर्त्वा
विद्ययामृतमश्नुत इत्युक्तं॥ तत्र केन मार्गेणामृतत्वमश्नुत इत्युच्यते तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मि
सह। परविषयया तं प्रत्येत दुक्तं विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया [illegible] २
ब्रह्म

ईश·भा·
९

न्मंडलेपुरुषोयश्चायंदक्षिणेक्षन्पुरुष ए तदुभयंसत्यंब्रह्मोपासी नो यस्योक्तकर्मलक्षणः सोंतकालेप्राप्तेसत्यात्मानमा
त्मनः प्राप्तिद्वारंयाचते॥ हिरण्मयेनपात्रेणहिरण्मयमिवहिरण्मयंज्योतिर्मयमित्येतत्॥ तेनपात्रेणेवापिधानभूते
नसत्यस्यआदित्यमंडलस्थस्यसंहापरब्रह्मविषयातदुक्तं॥ विद्यांचाविद्यांचयस्तद्वेदोभयंसह॥ अविद्ययाब्र
✓ आ ह्मणः अपिहितंछादितंमुखंद्वारं। तत्वंहेपूषन्नपावृणु। सत्यधर्मायितवसत्येस्योपासनात्सत्यंधर्मायस्यममसो
हंसत्यधर्मायेतस्मैमह्यं। अथवायथाभूतस्यधर्मस्यअनुष्ठात्रे। दृष्टये। तवसत्यात्मनउपलब्धये॥१५॥ ॥हेपू
षन्जगतःपोषणात्पूषा रविः तथैकएवऋषतिगच्छतीत्येकऋषिः। हेएकऋषेतथासर्वस्यसंयमनाद्यमोहेय
मतथारश्मीनांप्राणानांरसानांचस्वीकरणात्सूर्योहिसूर्य। प्रजापतेरपत्यंप्रजापत्योहेप्राजापत्य। व्यूह। विगम राम
य। रश्मीन्स्वान्समूह। एकीकुरुउपसंहर। तेजस्तापकंज्योतिर्येनतेतवरूपंकल्याणतमंअत्यंतशोभनंतत्तेत ९

र्वर्तते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वात्मनः प्रसादात्पश्यामि॥१६॥ किंचाहं नतु त्वां भृत्यवद्याचे। यः असौ मंडलस्थो व्याहृत्यवयवः पुरुषः पुरुषा
कारत्वात्पूर्णमनेन प्राणबुध्यात्मना जगत्समस्तमिति पुरुषः पुरिशयनाद्वासोहमस्मि भवामि॥ अथेदानीं म
ममरिष्यतो वायुः प्राणो ध्यात्मपरिछेदं हित्वा॥ अधिदैवतात्मानं। सर्वात्मकं मनिलं ममृतं सूत्रात्मानं प्रति
पद्यतामितिवाक्यशेषः। लिंगंचेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यं। मार्गयाचनसामर्थ्यादथेदं शरीरमग्नौ
हुतं भस्मांतं भूयात्॥ ॐ मिति यथोपासनमोंप्रतीकात्मकत्वात्सत्यात्मकमग्न्याख्यं ब्रह्माभेदेनोच्यते। हे क्र
तो संकल्प्यात्मक। स्मर। यन्मम स्मर्त्तव्यं तस्य कालोयं प्रत्युपस्थितोऽ तस्मर एतावंतं कालं भावितं। कृतमग्ने
स्मर यन्मया बाल्ये प्रभृति अनुष्ठितं कर्म तच्च स्मर। क्रतो स्मर। कृतं स्मरेति॥ पुनर्वचनमादरार्थं॥१७॥
पुनरप्यन्येन मंत्रेण मार्गं याचते॥ अग्नेनय गमयस्कृपथा शोभनेन मार्गेण स्कृपथेति विशेषणं दक्षिणमार्ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश॰भा॰
१०

निवृत्यर्थं निर्विण्णोहं दक्षिणेन मार्गेण गतागतलक्षणेन अतो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन
न पथा नय ॥ राये । धनाय । कर्मफलभागायेत्यर्थः ॥ अस्मान् ॥ यथोक्ताधर्मफलविशिष्टान् । विश्वानि ॥ सर्वा
णि ॥ हे देव वयुनानि ॥ कर्माणि प्रज्ञानानि विद्वान् जानन् ॥ किंच युयोधि वियोजय विनाशय अस्मत् अस्मत्तो
जुहुराणं कुटिलं वंचनात्मकमेनः पापं ततो वयं विशुद्धाः संतः इष्टं प्राप्स्याम इत्यभिप्रायः ॥ किंतु वयमिदानीं
ते न शक्नुमः परिचर्यां कर्तुं भूयिष्ठां बहुतरां ते तुभ्यं नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेमेत्यर्थः ॥ ॥ अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥ विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुत इति श्रुत्वा
केचित्संशयं कुर्वंति अतस्तन्निर्धारणार्थं संक्षेपतो विचारं करिष्यामः । तत्र तावत्किंनिमित्तः संशय इत्युच्यते ॥ विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यते ऽमृतत्वं च ननूक्ता परमात्मविद्यायाः कर्मणा

राम
१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरोधो सर्वाश्रु

श्चविरोधात्समुच्चयानुपपत्तिः। सत्यं विरोधस्तु नावगम्यते विराधाविरोधयोः शास्त्रप्रमाणकत्वात् यथा विद्या
नुष्ठानमविद्योपासनं च शास्त्रप्रमाणकं तथा तद्विरोधाविरोधावपि। यथा च न हिंस्यात् भूतानीति शास्त्रादवगतं पुनः शा
२ बाध्यते स्त्रेणैव अध्वरेपि हिंस्यादिति एवं विद्याविद्ययोरपि स्यात्। विद्याकर्मणोश्च दूरमेते विपरीते विषूची अविद्या य
अ याच विद्येति श्रुतेः। विद्यां चाविद्यां चेति वचनाद विरोध इति चेन्न विरोधाविरोधयोर्विकल्पासंभवात्। अवि समुच्चवि
४ इति रोध एवेति चेत्। न। सह संभवानुपपत्तेः। क्रमेण स्यातां विद्याविद्ये चेत्। न विद्योत्पन्नौ तदाश्रये विद्यानुपपत्तेः नात् ४
न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पन्नौ यस्मिन्नाश्रयेन्नदुत्पन्नं तस्मिन्नेवाश्रये शीतोग्निरप्रकाशो वेत्य वि
द्याया उत्पत्तिः। नापि संशयोऽज्ञानं वा यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहादि संभवश्रुतेः।
अविद्यासंभवात्तदुपादानस्य कर्मणोप्यनुपपत्तिमवोचाम। अमृतमश्नुत इत्यापेक्षकममृतं विद्याशब्देन परमा
२ कोमोहः कः शोक एकत्वमनुपश्यत इति शोक २ अविद्यायाः त्वात् ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपासनया समुच्चयः न परमात्मविज्ञानेनेति

ईश·भा· त्मविद्याग्रहणे हिरण्मयेनेत्यादिना द्वारमार्गादियाचनमनुपपन्नं स्यात्। तस्माद्यथाव्याख्यात एव मंत्राणामर्थ

११ इत्युपरम्यते॥ ॥इतिश्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीपरमहंसपरिव्राजकाचार्यस्य श्रीशंकरभग

वतः कृतौ ईशावास्यभाष्यं समाप्तं॥ ॥यदुत्पद्यते तदुत्पाद्यं। यत्सिद्धमेव प्राप्यते तदाप्यं। यत्र गुणाधानं मला

पकर्षो वा क्रियते तत्संस्कार्यं। यत्र स्वगुणपरित्यागेन रूपांतरं क्रियते तद्विकार्यं॥ ॥छ॥ ॥छ॥

निरपेक्षः शब्दः श्रुतिः॥ शब्दस्यार्थप्रकाशनसामर्थ्यं लिंगं॥ पदयोग्यतापदाकांक्षासाकं वाक्यं॥ अंगवाक्यसापेक्षं प्रधा

नवाक्यं प्रकरणं॥ क्रमपाठेनानामर्थानां क्रमपाठेतैर्यथाक्रमं संबंधः स्थानं॥ संज्ञासाम्यं समाख्या॥

राम

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति शंकरानंदकृता ईशावास्योपनिषद्दीपिका समाप्ता ॥५॥ श्रीरस्तु ॥ ॥

॥ ॥ इति शंकरानंदकृताईशावास्योपनिषद्दीपिकासमाप्ता ॥५॥ श्रीरस्तु ॥ ॥कुंजघरत्रेपाठकोपनामकडडुनरसिं

शाके १६६४ दुंदुभ्यब्दे माधवसितएकादश्यां कुंजघरत्रेपाठकोपनामकडडुनरसिं

तनुगाश्रीपसहेनेदंपुस्तकं लिखितं श्रीमद्यादवप्रहानंदनामिवि ॥५॥ ॥ ५ ॥

॥श्रीमोहिनीराजोजयति ॥ श्री मोहिनी राजो ज

मग

पु. ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ACC NO! - 873

Title! - ईशावास्यभाष्य

Author! - शंकराचार्य

subject! .. वेदांत

पेज! - 13

KKSU LIBRARY
RAMTEK
441 106
M1091
Dist. Nagpur

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=18.10.20 14:27
,TRANSFERRED=2020/10/18 at 14:30:17
,PAGES=25
,TYPE=STD
,NAME=S0004131
,Book Name=M-1091-ESHAVASYA BHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection